CSM—77/22

# SANSKRIT

## PAPER—II

Candidate must not write on this margin.

**Time : 3 Hours**

**Full Marks : 250**

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt* ***any 5 (five)*** *questions of* **GROUP—A** *with word limit of 250 words and should attempt* ***any 5 (five)*** *questions from* **GROUP—B** *with word limit of 300 words.*

### GROUP—A

**निर्देश:** अधोलिखितेषु प्रश्नेषु **पञ्चप्रश्नाना**–मेवोत्तरं विधेयम्। पञ्चमः प्रश्नः अनिवार्यः यस्योत्तरं संस्कृतभाषयैव निरूपणीयम्। प्रत्येकं प्रश्नः सार्धद्विशत (250) परिमित शब्दैः उत्तरणीयः।

**1.** *(a)* रघुवंशस्य सांस्कृतिकं वैभवं प्रदर्शयत। 15

*(b)* दशकुमारचरितस्य नीतिपरकोपदेश स्वरूपं निरूपयत। 15

**2.** *(a)* कठोपनिषदि प्रतिपादितं रथरूपकं वर्ण्यताम्। 15

*(b)* श्रीमद्भगवद्गीतामनुसृत्य आत्मनः स्वरूपं प्रतिपाद्यताम्। 15

**3.** *(a)* मृच्छकटिके वर्णितं चारूदत्तस्य चारित्रिकं वैभवं प्रसाधयत। 15

*(b)* उत्तररामचरितस्य तृतीयाङ्कस्य वैशिष्ट्यं निरूपयत। 15

**4.** *(a)* अभिज्ञानशाकुन्तलमवलम्ब्य महाकवि कालिदासस्य नाट्यसौन्दर्यं समीक्ष्यताम्। 15

*(b)* शिवराज्योदये चरितनायकस्य वैशिष्ट्यानि निरूप्यन्ताम्। 15

**5.** *(a)* सांख्यकारिकामवलम्ब्य पुरुषबहुत्वं प्रसाधयत। 15

*(b)* पृथिवीद्रव्यस्य लक्षणं भेदादिसहितं निरूप्यताम्। 15

**6.** *(a)* मेघदूतमवलम्ब्य भट्टाकवि कालिदासस्य अलङ्कृतिसौन्दर्यं वर्ण्यताम्। 15

*(b)* नीतिशतकमभिलक्ष्य मुख्योपदेशाः वर्णनीयः। 15

## GROUP—B

**निर्देशः** अधोलिखितेषु प्रश्नेषु **पञ्च**प्रश्नाः समाधेयाः। सप्तमाष्टम प्रश्नयोर्मध्ये एकः प्रश्नः अनिवार्यतः समाधेयः।

**7.** अधोलिखितयोः श्लोकयोः व्याख्या प्रत्येकं सार्ध-शतेन (150) शब्दैः देवनागरीलिप्या संस्कृत भाषायामेव कार्या : 10×2=20

(*a*) कृतारिषड्वर्गजयेन मानवी
भगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्।।

(*b*) यश्चाप्सरोविभ्रममण्डनानां
सम्पादयित्रीं शिखरैर्बिभर्ति।
बलाहकच्छेदविभक्तरागा
मकालसन्धयामिव धातुमत्ताम्।।

**8.** अधोनिर्दिष्टयोः व्याख्या नागराक्षरैः प्रत्येकं सार्धशतेन (150) परिमितैः शब्दैः संस्कृत भाषाया-मेव विधेया : 10×2=20

(*a*) न जायते म्रियते वा कदाचिन्
नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे।।

(*b*) यस्मिन् सर्वाणि भूतान्यात्मैवाभूद् विजानतः।
तत्र को मोहः कः शोकः एकत्व मनुपश्यतः।।

**9.** अधोलिखितयोः व्याख्या प्रसङ्गनिर्देशपूर्वकं कार्या। प्रत्येकं सार्धशतपरिमितैः शब्दैः उत्तरणीयाः। 10×2=20

(*a*) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्आ मोघा वरमधिगुणे नाधमे लब्धकामा।।

Candidate must not write on this margin.

(b) इयं संवर्धनवारिधारा तृष्णाविषवल्लीनाम् व्याधगीति
रिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्
विभ्रमशय्या मोहदीर्घनिद्राणाम् निवासजीर्णवलभी
धनमदपिशाचिकानाम्, तिमिरोद्गतिः शास्त्र दृष्टी-
नाम्, पुरःपताका सर्वाविनयानाम्, उत्पत्तिनिम्नगा
क्रोधावेगग्राहाणाम्।

**10.** अधोलिखितयो राशयः ससन्दर्भः प्रत्येकं सार्धशतेन (150) शब्दैः प्रतिपादनीय : 10×2=20

(a) शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याध्यः।।

(b) इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिसरः
किमस्या न प्रेयो यदि परमसहयस्तु विरहः।।

**11.** अधोलिखितयोरूत्तरं प्रत्येकं सार्धशतेन (150) परिमितैः शब्दैः दीयताम्। 10×2=20

(a) तर्कसंग्रहानुसारं समवायपदार्थस्य स्वरूपं प्रतिपाद्यताम्।

(b) सांख्यकारिकानुसारं पुरुषस्वरूपं प्रतिपाद्यताम्।

**12.** अधस्तनयोः स्वरूपं प्रत्येकं सार्धशतेन परिमितैः शब्दैः (150) प्रसाध्यताम् : 10×2=20

(a) वेदान्तसारे वर्णितं अधिकारिस्वरूपं निरूप्यताम्।

(b) मनुस्मृतिमवलम्ब्य ब्रह्मचारिधर्माः वर्णनीयाः।

★★★

Candidate must not write on this margin.